© 2017 IJSRST | Volume 3 | Issue 8 | Print ISSN: 2395-6011 | Online ISSN: 2395-602X
Themed Section: Science and Technology

# संस्कृतस्य वैज्ञानिकमहत्त्वम्



त्रिलोकीनाथ मिश्र
शोधच्छात्र
राष्ट्रीय संस्कृतसंस्थान,
मुम्बई परिसर

**वैज्ञानिकाश्च कपिलाः कणादःसुश्रुतस्तथा ।**

**चरको भास्कराचार्यो वराहमिहिरः सुधीः ॥**[1]

**नागार्जुनो भरद्वाजः आर्यभट्टो वसुर्बुधः ।**

**ध्येयो वेङ्कटराजश्च विज्ञारामानुजादयः ॥**[2]

षष्टितन्त्रोपदेशकः सांख्यकारिका-सांख्यदर्शनप्रभृतविविधग्रन्थोपेतोऽयं कपिलमुनिः पुराणेषु सिद्धपुरुषः मन्यते । परमाणुवादिदार्शनिकः, विश्वतत्त्वानां षड्सु पदार्थेषु वर्गीकरणकर्ता महर्षिकणादः परमाणुवाद-क्रियासम्बद्ध-वैज्ञानिकविश्लेषणाय च लोकविश्रुतः वर्तते । शल्यचिकित्साविशेषज्ञः, सुश्रुतग्रन्थप्रणेता आयुर्वेदाचार्यः असौ सुश्रुत आधुनिककालेऽपि शल्यक्रियायन्त्रैः विस्मितान् करोति आधुनिकान् वैज्ञानिकान् । शतपथब्राह्मणे लभ्यमानस्य उल्लेखस्य सुपरिचितः आयुर्वेदाचार्यः चरकः **चरकसंहिता** इत्यस्य आयुर्वेदग्रन्थस्य रचयिता वर्तते । आचार्यरचितग्रन्थस्य अनूदनं विश्वस्य विविधासु भाषासु जातमस्ति । उज्जैनवेधशालाध्यक्षः, गुरुत्वाकर्षणसिद्धान्तप्रतिपादकः **न्यूटनात् 500 वर्षाणि पूर्वमेव** सिद्धान्तशिरोमणिः,करणकुतूहलं, लीलावती बीजगणितरचनोपेतः असौ विद्वान् कलिसंवत् 43तमशताब्दस्य गणितज्ञः एवञ्च ज्योतिषिः आसीत् । विक्रमादित्यस्य राजसभायाः नवरत्नेषु गणमान्यः उज्जैनवास्तव्यः बृहत्संहिताग्रन्थप्रणेता विक्रमादित्यकालिदासादयोः समकालिको प्रसिद्धज्यौतिषिकः वराहमिहिरनामाख्याता लोकविश्रुतः बभूव ।

अष्टाङ्गहृदय-माध्यमिककारिका-विग्रहव्यावर्तिनीत्यादीनां ग्रन्थानां रचयिता, आचार्यः नागार्जुनः विदर्भप्रान्ते जन्म प्राप्तवान् । आचार्यः असौ रसायनशास्त्रज्ञः बभूव । चीनी-जापानीभाषास्वपि रसायनशास्त्रस्य अनुवादः प्रचलन् आसीत् ।

---

[1] डा.हरिश्चन्द्र बर्थ्वाल भारत एकात्मता स्तोत्र व्याख्या, सुरुचिप्रकाशन केशव कुञ्ज नवदेहली-110055, श्लोकसं.26,पृष्ठसंख्या-51,52,।

[2] . भारत एकात्मता स्तोत्र - श्लोकसं.27

मन्त्रद्रष्टा वैदिक-ऋषिः, विमानविद्यावेत्ता यन्त्रसर्वस्वम् अंशुतन्त्रम्, आकाशशास्त्रञ्च इत्येतेषां ग्रन्थानाम् आविष्करणम् अकरोत् । विमानशास्त्रज्ञः महर्षिः भरद्वाजः विमानविद्यायाः मूर्धन्यः विद्वान् आसीत् । **पृथिवी एव सूर्यं परिक्रमति**[3] इत्यस्य नियमस्य स्रष्टा आचार्यः **आर्यभट्टीयम्** एतस्य ग्रन्थस्य रचनामकरोत् । भौतिकशास्त्रज्ञः वनस्पतिशास्त्रप्रणेता आचार्यः प्रोफेसर् जगदीशचन्द्रबसुः महान् वैज्ञानिकः अभूत् । तमिलनाडुप्रान्ते लब्धजन्मासौ चन्द्रशेखरवेङ्कटरमणाचार्यः भौतिकवैज्ञानिकः आसीत् । गणितशास्त्रविज्ञः आचार्यः रामानुजः संस्कृतस्य संपोषकः बभूव । एतैः प्राचीनैः ऋषिभिः मुनिभिः पण्डितैश्च मानवजीवनं सुखमयं विधातुं स्वानुभवेन तपश्शक्त्या च सम्पादितं बहुविधं विज्ञानं संस्कृतभाषया विरचितमासीत् ।

मानवानां स्वास्थ्यसंरक्षणाय आयुषः वर्धनाय, व्याधीनां निवारणाय च आयुर्वेदः नितरामुपकारको वर्तते । गृहनिर्माणाय वास्तुशास्त्रं यज्ञयागादीनां विवाहादीनां शुभकर्मणाम् अनुष्ठानाय, मानवस्य भूतवर्तमानभविष्यज्ञानाय च ज्योतिश्शास्त्रम्, उत्तमव्यक्तित्वस्य निर्माणाय संस्काराणां प्रतिपादकं धर्मशास्त्रम् अर्थव्यवस्थायाः संरक्षणेन प्रजानां हितस्य परिरक्षणाय अर्थशास्त्रम्, ऐहिकभोगानां प्रतिपादकं कामशास्त्रम् इत्यादीनि अनेकानि शास्त्राणि संस्कृतेन रचितानि सन्ति ।




**0 (SUNYA) शून्यम्**[4]

[3] .संस्कृतशिक्षणम् नवीनप्रविधयश्च - डा.फतेहसिंहः,डा.च.ल.ना.शर्मा

[4] SCIENCE IN SANSKRIT,SAMSKRITBHARTI PRKASHNAM,NEW DELHI-पृष्टसंख्या-59

**"We owe a lot to Indians, Who taught us how to count without which no worth -which no worth-while scientific discovery could have been made."**

**-ALBERT EINSTIEN**

**VALUE OF PI $\pi$**

**चतुरधिकं शतमष्टगुण**

**द्विषष्टिस्तथा सहस्राणाम्**

**अयुतद्वयविष्कम्भस्य आसन्नो वृत्तपरिणाहः।** आर्यभट्टीयम् [5]

**PI = Circumference/DIAMETER = 62832/2000 = 3.1416**

**PULSE-TEST**

**करस्याङ्गुष्ठमूले या धमनी जीवसाक्षिणी।**

**तच्चेष्टया सुखं दुःखं ज्ञेयं कायस्य पण्डितैः ।।**[6]

**Experts know the health or disease of the body through testing the life indicating pulse (Nadi) below the root of the thumb.**

बहूनि वैज्ञानिकतत्वानि भारतीयैः विद्वद्भिः इदम्प्रथमतया प्रतिपादितानि लोके अपरिचितान्येव सन्ति । गणितशास्त्रे शून्यम् , दशमाङ्कपद्धतिः, **पै** इत्यस्य मूल्यं पैथागोरससिद्धान्तः वर्गमूलं, घनमूलमित्यादयः बहवः सिद्धान्ताः प्राचीनभारतीयैः प्रतिपादिता अपि पाश्चात्यानामेव प्रतिभाप्रसूताः इति मन्यन्ते।

आधुनिकैः अधीयमानानि बहूनि शास्त्राणि नामान्तरेण संस्कृते दृश्यन्ते । तानि च विमानशास्त्रं,वनस्पतिशास्त्रं,रसायनशास्त्रं,धातुशास्त्रं,शल्यचिकित्सा,वृक्षायुर्वेदः,सामुद्रिकशास्त्रं,शकुनशास्त्रं,भूतचिकित्सा योगशास्त्रमित्यादीनि सन्ति।

---

5 . SCIENCE IN SANSKRIT,SAMSKRITBHARTI PRKASHNAM,NEW DELHI-पृष्टसंख्या-67

6 .नाड़ीदर्पणम्- SAMSKRITBHARTI PRKASHNAM,NEW DELHI, SCIENCE IN SANSKRIT BOOK.

संस्कृतस्य वैज्ञानिकतां प्रचारयितुं तिरुपति-राष्ट्रियसंस्कृतविद्यापीठद्वारा **Sanskrit& Science Exhibition** अपि च संस्कृतभारतीसंस्थाद्वारा **Science in Sanskrit** एवंविधा काचिद् संस्कृतविज्ञानप्रदर्शिनी सज्जीकृता वर्तते। यस्यायोजनं भारते विदेशेषु च विविधकार्यक्रमेषु कृतं क्रियमाणञ्चास्ति।